Seat No. : ____________

# MA-06

## Sanskrit Paper-II

**(ऋग्वेद मं. ७ अपठित)**

**Time : 3 Hours]** **[Total Marks: 100**

૧. આવશ્યક વિવરણ ઉમેરીને નીચેનામાંથી ગમે તે **ચાર** નો અનુવાદ કરો : (૨૦)

**1.** Translate adding notes where necessary any **four** of the following : **(20)**

(१) मा शूने॑ अग्ने॒ नि ष॑दाम नृ॒णां माशेष॑सो॒ ऽ वीर॑ता॒ परि॑ त्वा ।
प्र॒जाव॑तीषु॒ दु र्या॑सु दुर्य ।। - **७.१.११**

(२) प॒रि॒ष॒द्यं॑ ह्यर॑णस्य॒ रेक्णो॒ नित्य॑स्य रा॒यः पत॑यः स्याम ।
न शे षो॑ अग्ने अ॒न्यजा॑तम॒स्त्यचे॑तानस्य॒ मा प॒थो वि दु॑क्षः ।। - **७.४.७**

(३) दु॒रा॒ध्यो॒ ३॒ अदि॑तिं स्रे॒वय॑न्तो ऽ चे॒तसो॒ वि ज॑गृभ्रे॒ परु॑ष्णीम् ।
म॒ह्नावि॑व्यक्पृथि॒वीं पत्य॑मानः प॒शुष्क॒विर॑शय॒च्चाय॑मानः ।। - **७.१८.८**

(४) यस्ति॒ग्मशृ॑ङ्गो वृष॒भो न भी॒म एकः॑ कृ॒ष्टीश्च्य॒ावय॑ति॒ प्र विश्वाः॑ ।
यः शश्व॑तो॒ अदा॑शुषो॒ गय॑स्य प्रय॒न्तासि॒ सुष्वि॑तराय॒ वेदः॑ ।। - **७.१९.१**

(५) श्वि॒त्यञ्चो॑ मा दक्षिण॒तस्क॑पर्दा धियंजि॒न्वासो॑ अ॒भि हि प्र॑म॒न्दुः ।
उ॒त्तिष्ठ॑न्वोचे॒ परि॑ ब॒र्हिषो॒ नॄन्न मे॑ दू॒रादवि॑तवे॒ वसि॑ष्ठाः ।। - **७.३३.१**

(६) अ॒न्यो अ॒न्यमनु॑ गृभ्णात्येनोर॒पां प्र॑स॒र्गे यदम॑न्दिषाताम् ।
म॒ण्डूको॒ यद॒भिवृ॑ष्टः॒ कनि॑ष्कन्॒पृश्निः॑ संपृ॒ङ्क्ते हरि॑तेन॒ वाच॑म् ।। - **७.१०३.४**

(७) सु॒वि॒ज्ञानं॑ चिकि॒तुषे॒ जना॑य॒ सच्चास॑च्च॒ वच॑सी पस्पृधाते ।
तयो॒र्यत्स॒त्यं य॑त॒रदृजी॑य॒स्तदित्सोमो॑ऽवति॒ हन्त्यास॑त् ।। - **७.१०४.१२**

૨. નીચેનામાંથી ગમે તે **ચાર** ના ઉત્તર આપો : (૧૬)

**2.** Answer any **four** of the following : **(16)**

(१) પ્રશ્ન-૧ (૬) નો પદપાઠ આપો.

(1) Write Pada-patha of Q. 1(6).

(૨) ईर्शे ह्य ३ ग्निर्मृतंस्य । (૭.૪.૬) નું સ્વરાંકન સમજાવો.

(2) Explain the accent in ईर्शे ह्य ३ ग्निर्मृतंस्य । (7.4.6)

(૩) પ્ર.૧ (૧) નો છન્દ સમજાવો.

(3) Scan the metre of Q. 1(1).

(૪) વૈદિક लेट्लकार વિશે નોંધ લખો.

(4) Write a note on वैदिक लेट्लकार:

(૫) રૂપ ઓળખાવો. (ગમે તે **ચાર**) :

(5) Recognise any **four** forms :

| | | |
|---|---|---|
| (i) दुक्ष: । | (ii) ववृधे । | (iii) अहन् । |
| (iv) अवभेत् । | (v) मुषायत् । | (vi) रेजन्ते ।। |

(६) स्वतन्त्रस्वरितस्य चतुर्विधप्रकारा: ।

૩. નીચેનામાંથી ગમે તે **બે** વિશે ટૂંકનોંધ લખો : (૧૮)

**3.** Write notes on any **two** of the following : **(18)**

(क) दाशराज्ञ-युद्ध कथा ।

(ख) प्रस्वापिनी-उपनिषद् ।

(ग) आप्रीसूक्तम् ।

(घ) વૈદિક સંસ્કૃતભાષાની વિશેષતાઓ.

(घ) Special features of the वैदिक संस्कृतभाषा

**અથવા/OR**

**3.** ઐતિહાસિક અને પુરાકથાશાસ્ત્રની દૃષ્ટિએ વૈદિક દેવતા-વરુણ વિશે વિસ્તૃત નોંધ લખો.

**3.** Write a detailed note on the Vedic dity Varuna in the light of History and Mythology.

૪. નીચેનામાંથી ગમે તે **બે** નો અનુવાદ કરો : (૧૮)

**4.** Translate any **two** of the following : **(18)**

(१) आधुनिका युरोपादिदेशस्था: सिद्धा: पाञ्चभौतिकद्रव्यसाहाय्येन दूरदर्शनं दूरश्रवणादिकं समपादयन् आश्चर्य-मुत्पादयन्ति । सम्प्रति तु चन्द्रादिग्रहमण्डलानि गन्तुकामा: सन्ति परन्तु तेषां सामर्थ्यस्य मर्यादास्ते । यत्र पाञ्च-भौतिकपदार्थानां गतिस्तत्रैव तै: कार्यं कर्तुम्पार्यते, परन्तु स्वशरीरेणाकाशगमनं स्वशरीरस्य लघ्वणुमहद्भवनादिकार्यं केवलं शक्त्यैव संपादानीयम्, तत्र ते न प्रभवन्तीति तेऽपि विदन्त्येव । चित्तं सर्वव्यापकं सर्वपदार्थकरणसमर्थं सर्वज्ञातृ चास्ति । तत्र चेतसि महाशक्तितत्वं मलादिवासनाभिर्लीनं विद्यते, तद्यदि केनाप्युपायेन प्राचीनभारतीयै: प्रोक्तशमदमादिसाधनजातेन प्रस्फुरितं भवेत्तदा तु नूतनं जगत्स्रष्टुं सामर्थ्यं मानवाधीनं भवेदिति । उक्तञ्च पतञ्जलिना - 'सर्वावरणमलापेतस्य ज्ञानस्यानन्त्याद् ज्ञेयमल्पम् ।' सर्वैरावरणकैर्मलैर्यदा चितं रहितं भवति तदा तदनन्तं सर्वप्रकाशं च भवति, तदग्रे ज्ञातव्यं वस्त्वप्यल्पं विद्यते । चित्तस्य व्यापकत्वं प्रकृत्या नियमितं मधुमक्षिकादिकीटकेषु दृश्यते ।।

(२) चिन्त्यम् - यच्छास्त्रे 'श्मशाने शून्यागारे वृक्षमूलेऽप्येकदा निवसति मुनि:' क्व भवादृशां कृते पर:सहस्राणि रूप्यकाणि व्ययीकृत्य मनोरमा उपाश्रया विधीयन्ते, अयमेव जैनर्षीणां किमनवद्या पद्या । एकस्या इष्टिकायाश्चयेऽपि षण्णामपि जीवनिकायानां निश्चितं विनाशस्तदा बृहतो निलयान् निर्मापयिषूणां युष्माकं कथमिव त्रिकोटि-विशुद्धं महाव्रतपञ्चकं स्थैर्यमालम्बते ! न वाच्यम्, प्रथमे महाव्रते ह्यायाति सूक्ष्मा क्षतिरिति । भग्ने खल्वेकस्मिन् महाव्रते भवन्ति मुनीश्वराणां पञ्चापि महाव्रतानि भग्नानि । यतोऽस्ति गृहस्थानां धर्म स्वर्णतुल्यम्, यच्छकलितमपि श्रयति यथार्हं मूल्यम्, परन्तु मुनीनां महाव्रतपञ्चकं तु विलसति व्यपगतमलमखण्डमौक्तिक सब्रह्मचारि । यत्र कुत्रापि किञ्चित् खण्डीभूतञ्चेद् गतगतं तस्यार्घ्यमर्धम् । हिंसा विदधानास्तदनङ्गीकारे मिथ्यावाग्दोष: स्वयमवकाशं लभते । हिंस्यमानजीवानां नास्ति सूक्ष्माप्यनुमति: स्वप्राणग्रहणाय ततोऽदत्तादानापराधोऽपि निर्बाध: स्यात् ।।

(३) इदमपरमप्यालस्यं या दीर्घसूत्रता नाम । योऽल्पकालसाध्यमर्थं बहुना कालेन करोति स दीर्घसूत्र: । अयमप्यलसान्निरुक्तान्नातिभिद्यते । यस्य खलु गतिर्मन्दा सोऽवहीयते, स दूयते, स विपद्यते । य: खलु विद्यार्थी मन्दो लेखने सोऽशक्तो नियतेन समयेन होरात्रयादिना प्रश्नावलिमुत्तरयितुम्, यश्च शीघ्र: स प्रगल्भते तत्र कर्मणीति भूयोऽङ्कलब्धिस्तस्य भवति । य: खल्वप्यध्ययने मन्द: स चिरमधीयान्नोऽपि न पारयति बेध्येतुमिति तस्य शास्त्रावलोकने रसो ग्लायति । तेन चाल्पश्रुत एवासौ तिष्ठति सर्वमायुर्न बहुश्रुततां सम्पादयति । एवमन्योऽपि कश्चिद् वाने वा कर्तने वा सेवने वा चिरक्रियोऽल्पमेव वयति, कृणत्ति, सीव्यति वा, येनाल्पीयानेवास्यायो भवति । एवं प्रवृत्यन्तरेष्वप्यूह्यम् ।

(४) कथैका भक्तमाले लिखिताऽस्ति - कश्चिदेको मनुजो महीरुहतले सुष्वाप । शयान एवासौ पञ्चत्वमाप । उपरिष्टाद् वायसो मलमुत्ससर्ज । तन्मलं तदीयललाटे तिलकाकृतिर्बभूव । तत्र यमकिङ्करास्तं नेतुं समाययु: । अत्रान्तरे विष्णुदूता अपि समासेदु: । ते विवादं चक्रिरे । यमकिङ्करा ऊचु: - 'अस्माकं स्वामिनो निर्देशानुसारं वयमेनं यमलोकं नेष्याम:" इति । विष्णुदूता बभाषिरे "अस्मत्स्वामिन एनं वैकुण्ठं नेतुमादेशोऽस्ति । आलोक्यतामस्य ललाटे वैष्णवानां तिलकं विद्यते । कथमेनं नेष्यन्ति भवन्त: ?" इति । तदा तु यमसेवकास्तूष्णीका: संवृत्य यथागतं ययु: । विष्णुदूता: सुखेन तं वैकुण्ठं निन्यु: । नारायणस्तं वैकुण्ठे निदधे ।।

**૫.** અધોલિખિત પરિચ્છેદ વાંચીને તેની નીચેના પ્રશ્નોના ઉત્તર સંસ્કૃતમાં આપો (ગમે તે છ) : **(૧૨)**

**5.** Read the passage given below and answer in Sanskrit the questions given thereunder (any **six**) : **(12)**

रघुरपि प्रात: कुबेरं प्रत्यभियातुं निश्चिकाय । ततो यावत् प्रातरेव रथमारुरुक्षु: स उदतिष्ठत् तावदेव भाण्डागारिकैरागत्य विनयावनतै: निवेदितम् - यन्महाराज ! रात्रौ कोषागारे हेमवृष्टिरभवदिति । ततो रघुरपि तामद्राक्षीत् । ततश्च सुमेरुपर्वतमिव स्थितं सुवर्णराशिं रघु: विदुषे कौत्साय अददात् । कौत्सोऽपि सुतप्राप्त्याशिषस्तस्मै दत्त्वा गुरोराश्रममाजगाम । ततोऽचिरादेव रघोर्महिष्या: सुतरत्नमेकमजायत य: खलु 'अज' इति नाम्ना प्रसिद्धिमगात् ।

एवं क्रमेण स यथाकालं शिक्षादिकं प्राप्य किशोरावस्थामत्यवाहयत् । तत: स पितुराज्ञयेन्दुमत्या: स्वयंवरे प्रातिष्ठत । मार्गे च मातङ्गमहर्षिशापवशाद् गजत्वं प्राप्तं प्रियंवदं बाणेनाहत्य गजयोनितस्तं मोचयामास । प्रसन्नो भूत्वा स च तस्मै सम्मोहननमकास्त्रं समर्पयत् । स चेत्थं विदर्भराजभोजस्य नगरीं प्राप्त: । भोजोऽपि तस्य स्वागतं विधायैकस्मिन् सर्वालङ्कारभूषिते शोभने राजप्रासादे तं न्यवासयत् । अन्येद्यु: प्रातरेव वरोचितवेशभूषां विधाय राजाधिष्ठितं स्वयंवरं प्रति जगाम ।।

**प्रश्नाः**

(१) रघु: कं प्रत्यभियातुं निश्चिकाय ?

(२) भाण्डागरिकैः किम् निवेदितम् ? कस्मै ?

(३) रघु: विदुषे कौत्साय किमददात् ?

(४) कौत्सः रघवे किम् दत्वा गुरोराश्रममाजगाम ?

(५) रघोः सुतरत्नस्य नाम किमासीत् ?

(६) अजः कस्याः स्वयंवरे प्रातिष्ठत ?

(७) अजः मार्गे गजयोनितः कं मोचयामास ?

(८) अन्येद्युः प्रातरेव अजः कुत्र जगाम ?

૬. નીચેનામાંથી ગમે તે **બે** સંસ્કૃતમાં સમજાવો : **(૧૬)**

**6.** Explain in Sanskrit any **two** of the following : **(16)**

(१) विद्युत्वन्तं ललितवनिताः सेन्द्रचापं सचित्राः
संगीताय प्रहतमुरजाः स्निग्धगम्भीरघोषम् ।
अन्तस्तोयं मणिमयभुवस्तुङ्गमभ्रंलिहाग्राः
प्रासादास्त्वां तुलयितुमलं यत्र तैस्तैर्विशेषैः ।।

(२) नेत्रा नीताः सततगतिना यद्विमानाग्रभूमी –
रालेख्यानां नवजलकणैर्दोषमुत्पाद्य सद्यः ।
शङ्कास्पृष्टा इव जलमुचस्त्वादृशा जालमार्गे –
र्धूमोद्गारानुकृतिनिपुणा जर्जरा निष्पतन्ति ।

(३) तत्रागारं धनपतिगृहानुत्तरेणास्मदीयं
दूराल्लक्ष्यं सुरपतिधनुश्चारुणा तोरणेन ।
यस्योपान्ते कृतकतनयः कान्तया वर्धितो मे
हस्तप्राप्यस्तबकनमितो बालमन्दारवृक्षः ।

(४) तस्यास्तीरे रचितशिखरः पेशलैरिन्द्रनीलैः
क्रीडाशैलः कनककदलीवेष्टनप्रेक्षणीयः ।
मद्गेहिन्याः प्रिय इति सखे चेतसा कातरेण
प्रेक्ष्योपान्तस्फुरिततडितं त्वां तमेव स्मरामि ।।